इन्द्रियोपरमः। इति चण्डिटीकायां नागोजीभट्टः ॥ तत्पर्य्यायः । शमथः २ शमः ३ । इत्यमरः॥ प्रशमः ४ उपशमः ५ प्रशान्तिः ६ । इति शब्दरत्नावली ॥ तृष्णाक्षयः ७ । इति हेमचन्द्रः ॥ तल्लक्षणं यथा,—

'यत्किञ्चिदस्तु संप्राप्य स्वल्पं वा यदि वा बहु ।
या तुष्टिर्जायते चित्ते शान्तिः सा गद्यते बुधैः॥"

इति पद्मपुराणे क्रियायोगसारे १५ अध्यायः ॥ भद्रम् । इति हेमचन्द्रः ॥ गोपीविशेषः । यथा,

राधिकोवाच ।

"शान्त्या गोप्या युतस्त्वञ्च दृष्टोऽहं रासमण्डले।
वसन्तपुष्पशय्यायां माल्यवान् चन्दनोक्षितः ॥
रत्नप्रदीपैर्युक्तश्च रत्ननिर्म्माणमन्दिरे ।
रत्नभूषितभूषाढ्यो रत्नभूषितया सह ॥
तया दत्तञ्च ताम्बूलं भुक्तवांश्च पुरा विभो ।
सद्यो मच्छब्दमात्रेण तिरोधानं कृतं तया ॥
शान्तिर्देहं परित्यज्य भयाद्धीना त्वयि प्रभो ।
ततस्तस्याः शरीरञ्च गुणश्रेष्ठं बभूव ह ॥
संविभज्य त्वया दत्तं प्रेम्णा प्ररुदता पुरा ।
विश्वे विषयिणे किञ्चित् सत्त्वरूपाय विष्णवे॥
शुद्धसत्त्वस्वरूपायै महालक्ष्म्यै पुरा विभो ।
त्वन्मन्त्रोपासकेभ्यश्च वैष्णवेभ्यश्च किञ्चन ।
तपस्विभ्यश्च धर्म्माय धर्म्मिष्ठेभ्यश्च किञ्चन ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥*॥

दुर्गा यथा,—

"उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता ।
सर्व्वज्ञा सर्व्ववेत्तृत्वाच्छान्तित्वाच्छान्तिरुच्यते॥"

इति देवीपुराणे देवीनिरुक्ताध्यायः ॥*॥

धर्म्मद्वारा ग्रहदौःस्थ्यदुःस्वप्नादिसूचितैहिकानिष्टहेतुदुरितनिवृत्तिः । यथा,—

"यथा शस्त्रप्रहाराणां कवचं विनिवारकम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणम् ॥"

बालग्रहभूतग्रहनराधिपप्रबलतरशत्रुदुःसहरोगाभिभवाद्भुतदुःस्वप्नग्रहदौःस्थ्यादिनिमित्तकं शान्तिकर्म्मापि मलमासे कर्त्तव्यम् । शुद्धकालप्रतीक्षायामसहत्वे नानन्यगतिकत्वात् । अतएवात्मानं सततं गोपायीत इति श्रुतौ सततमित्युक्तम् । इति मलमासतत्त्वम् ॥ * ॥ उपसर्गशान्तिगाथा यथा,—

"एषामिन्द्रो महावीर्य्यस्त्रैलोक्यस्येश्वरोऽभवत्।
शतं क्रतूनामाहृत्य सुशान्तिर्नाम नामतः ॥
तस्योपसर्गनाशाय नामाक्षरविभूषिता ।
अद्यापि मानवैर्गाथा गीयतेऽत्र महीतले ॥
सुशान्तिर्देवराट् शान्तः सुशान्तिं न प्रयच्छति।
सहितः शिवसत्याद्यैस्तथैव वशवर्त्तिभिः ॥"

इति मार्कण्डेयपुराणे उत्तममन्वन्तरसमासाध्यायः ॥*॥

अथाद्भुतशान्तिः । तत्राद्भुतनिरूपणम् । अद्भुतसागरे आथर्व्वणाद्भुतवचनम् । प्रकृतिविरुद्धमद्भुतमापदः प्राक्प्रबोधाय देवा सृजन्तीति । तेनापज्ज्ञानाय भूम्यादीनां पूर्व्वस्वभावप्रच्यवो देवकर्त्तृकोऽद्भुत इति । एवञ्च बुधोदयपर्व्वणि ग्रहादीनां गणितागणितत्वेन प्रकृतानामपि यदुत्पातत्वं तद्भाक्तम् । तत्कारणञ्च गर्गसंहिताबार्हस्पत्ययोः ।

"अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः।
नरापचारान्नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपचारान्नियतमपवर्ज्जन्ति देवताः ।
ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान्॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च ॥"

तांश्च परं न दर्शयेदित्याह विष्णुः । नोत्पातं दर्शयेदिति । तत्र वेलानक्षत्रमण्डलनिरूपणम्। यथा, दीपिकायाम् ।

"प्राग्द्वित्रिचतुर्भागैर्द्यूनिशोरद्भुतेषु सर्व्वेषु ।
अनिलाग्निशक्रवरुणा मण्डलपतयः शुभाशुभेषु ॥"

वेलामण्डलः ।

"पर्य्यमृणादिचतुष्कचन्द्रतुरगादित्येषु वायुर्भवेत्
देवेज्याजविशाखयाम्ययुगले पित्र्यद्वये चानलः ।
विश्वादित्रयधातृमैत्रयुगलेष्विन्द्रो भवेन्मण्डलः
सर्पापान्त्यशतान्त्यमूलयुगलेशानेष्वपामीश्वरः॥
पवनदहनौ नेष्टौ योगस्तयोरतिदोषदः ।
सुरपतिवरुणौ शस्तौ योगस्तयोरतिशोभनः ॥
सवरुणमरुन्मिश्रः शक्रस्तथाग्निसमायुतः ।
फलविरहितः सेन्द्रो वायुस्तथाग्नियुतोऽम्बुपः ॥
यन्मण्डलेऽद्भुतं जातं शान्तिस्तद्दैवताश्रया ।
तथा शान्तिद्वयं कार्य्यं मण्डलद्वयजाद्भुते ॥*"॥

विष्णुधर्म्मोत्तरे ।

"ग्रहर्क्षवैकृतं दिव्यं आन्तरीक्षं निबोध मे ।
उल्कापातो दिशां दाहः परिवेशस्तथैव च ॥
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता तथा ।
एवमादीनि लोकेऽस्मिन् नाभसानि विनिर्द्दिशेत् ॥
चरस्थिरभवं भौमं भूकम्पमपि भूमिजम् ।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम् ॥
भौमं चाल्पफलं ज्ञेयं चिरेण परिपच्यते ।
नाभसं मध्यफलदं मध्यकालफलप्रदम् ।
दिव्यं तीव्रफलं ज्ञेयं शीघ्रकारी तथैव च ॥*॥
शीतोष्णताविपर्य्यासः ऋतूनां रिपुजं भयम् ।
पुष्पे फले च विकृते राज्ञो मृत्युं तथा दिशेत् ॥
अकालप्रभवा नार्य्यः कालातीताः प्रजास्तथा ।
विकृताः प्रसवाश्चैव युग्मप्रसवनं तथा ॥
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा त्रयः ।
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देहस्य कुलस्य च विनिर्द्दिशेत् ॥
प्रदोषे कुक्कुटारावो हेमन्ते चापि कोकिलाः ।
अर्कोदयेऽर्काभिमुखः श्वारावो नृभयं दिशेत् ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥
गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च ।
चिल्लश्च धर्म्मचिल्लश्च भासः पाण्डर एव च ॥
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते ।
पञ्चाश्मासात्तथा वर्षान्मृत्युः स्याद्गृहमेधिनः ।
पत्न्याः पुत्त्रस्य वा मृत्युर्द्रव्यञ्चापि विनश्यति ॥
ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा ।
गृह्णीयाद्यदि रोचेत शान्तिञ्चेमां प्रयोजयेत् ॥
इमां वक्ष्यमाणाम् ॥ * ॥
"मांसास्थीनि समादाय श्मशानाद्गृध्रवायसाः
श्वा शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत्॥
विकिरन्ति गृहाद्दौ च श्मशानं सा मही भवेत्।
चौरैश्च हन्यते लोकः परचक्रसमागमः ॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा ।
अद्भुतानि प्रसूयन्ते तत्र देशस्य विद्रवः ॥
अकाले फलपुष्पाणि देशविद्रवकारणम् ॥"

मत्स्यपुराणे ।

"अतिवृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतम् ।
अनृतौ तु दिनादूर्द्ध्वं वृष्टिर्ज्ञेया भयाय च ॥
निरभ्रे वाथ रात्रौ वा श्वेतं यस्योत्तरेण तु ।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च ॥
दिग्दाहपरिवेशौ च गन्धर्व्वनगरं तथा ।
परचक्रभयं विद्याद्देशोपद्रवमेव च ॥"

भासो वनकुक्कुटः ॥*॥ कंसनिधनसूचने हरिवंशः ॥

"वक्रमङ्गारकश्चक्रे चित्रायां घोरदर्शनः ।
चलत्यपर्व्वणि मही गिरिणां शिखराणि च ॥"

बाणोत्पाते स एव ।

"दक्षिणां दिशमास्थाय धूमकेतुः स्थितोऽभवत्
वक्रमङ्गारकश्चक्रे कृत्तिकासु भयङ्करः ॥" *॥

कृत्यचिन्तामणौ ।

"त्वक्सारीक्षविवेकतत्त्ववसुधा लोकाः क्षुधापीड़िताः
विप्रा वेदहतास्तथा प्रचलिता बह्वाशिनो दुःखिताः ।
क्षौणीमन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीड़िततरा दैवेज्यराह्वोर्युतौ ॥
रक्ते शस्त्रोद्योगो मांसास्थिवशादिभिर्मरकः।
धान्यहिरण्यत्वक्फलकुसुमाद्ये वर्षिते भयं विद्यात् ।
अङ्गारपांशुवर्षे विनाशमुपयाति तन्नगरम् ॥
उपलं विनाजलधरैर्विकृता वा यदा प्राणिनो दृष्टा ।
छिद्रं वाप्यतिवृष्टिं शस्यानामीतिसंजननम् ॥"

बुधकौशिकसंवादे ।

"वक्त्राः प्रपाते च फलं शरटस्य प्ररोहणे ।
शीर्षे राजश्रियोऽवाप्तिर्भाले चैश्वर्य्यमेव च ॥
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम् ।
नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनम्॥
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत् ।
धनलाभो बाहुमूले करयोर्धनहृच्छिदः ॥
स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनम् ।
पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनम् ॥
कटिद्वये वस्त्रलाभो गुह्ये सुहृत्समागमः ।